योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ३८

अष्टत्रिंशः सर्गः ३८

श्रीवसिष्ठ उवाच

अथाखिलजगज्जालक्रमपालनदेवनः ।

क्षीरोदनगरे शेषशय्यासनगतो हरिः ।। १

प्रावृण्निद्राव्युपरमे देवार्थमरिसूदनः ।

धिया विलोकयामास कदाचिज्जागतीं गतिम् ।। २

त्रिविष्टपं स्वमनसा पार्थिवं चावलोक्य सः ।

आचारमाजगामाशु पातालमरिपालितम् ।। ३

तत्र स्थिरसमाधाने स्थिते प्रह्लाददानवे ।

दृष्ट्वा संपदमिन्द्रस्य पुरे प्रौढिमुपागताम् ।। ४

व्यालतल्पतलस्थस्य क्षीरोदार्णवशायिनः ।

शङ्खचक्रगदापाणेर्देहस्यान्तरचारिणः ।। ५

पद्मासनस्थस्य मनः शरीरेणातिभास्वता ।

इदं संचिन्तयामास त्रैलोक्यालमहालिना ।। ६

प्रह्लादे पदविश्रान्ते पाताले गतनायके ।

कष्टं सृष्टिरियं प्रायो निर्दैत्यत्वमुपागता ।। ७

दैत्याभावे सुरश्रेणी निर्जिगीषुपदं गता ।

शममेष्यत्यदृष्टाब्दपटलेषु सरिद्यथा ।। ८

मोक्षाख्यं निर्गतद्वन्द्वं ततो यास्यति तत्पदम् ।

क्षीणाभिमानविरसा लतेव प्रविशुष्कताम् ।। ९

देवौघे शान्तिमायाते भुवि यज्ञतपःक्रियाः ।

अदेवत्वफलाः सर्वाः शममेष्यन्त्यसंशयम् ।। १०

क्रियास्वथोपशान्तासु भूर्लोकोऽस्तमुपैष्यति ।

असंसारप्रसङ्गोऽथ तस्य नाशे भविष्यति ।। ११

आकल्पान्तं त्रिभुवनं यदिदं कल्पितं मया ।

नाशमेष्यत्यकालेन तापे हिमकणो यथा ।। १२

किमेवमस्मिन्नाभोगे विलीय क्षयमागते ।

कृतं मयेह भवति स्वलीलाक्षयकारिणा ।। १३

ततोऽहमपि शून्येऽस्मिन्नष्टचन्द्रार्कतारके ।

वपुःप्रशान्तिमाधाय स्थितिमेष्यामि तत्पदे ।। १४

अकाण्ड एवमेवं हि जगत्युपशमं गते ।

नेह श्रेयो न पश्यामि मन्ये जीवन्तु दानवाः ।। १५

दैत्योद्योगेन विबुधास्ततो यज्ञतपःक्रियाः ।

तेन संसारसंस्थानं न संसारक्रमोऽन्यथा ।। १६

तस्माद्रसातलं गत्वा यथावत्स्थापयाम्यहम् ।

स्वे क्रमे दानवाधीशमृतुः पुनरिव द्रुमम् ।। १७

विना प्रह्लादमथ चेदितरं दानवेश्वरम् ।

करोमि तदसौ मन्ये देवानासादयिष्यति ।। १८

प्रह्लादस्य त्वयं देहः पश्चिमः पावनो महान् ।

आकल्पमिह वस्तव्यं देहेनानेन तेन च ।। १९

एवं हि नियतिर्देवी निश्चिता पारमेश्वरी ।

प्रह्लादेन यथाकल्पं स्थातव्यमिह देहिना ।। २०

तस्मात्तमेव गत्वा तु दैत्येन्द्रं बोधयाम्यहम् ।

गर्जन्गिरिनदीसुप्तं मयूरमिव वारिदः ।। २१

जीवनमुक्तसमाधिस्थः करोत्वसुरनाथताम् ।

मणिर्मुक्तमनस्कारः प्रतिबिम्बक्रियामिव ।। २२

नहि नश्यति सर्गोऽयमेवं सह सुरासुरैः ।

भविष्यति च तद्द्वन्द्वं तन्मे क्रीडा भविष्यति ।। २३

सर्गक्षयोदयावेतौ सुसमौ मम यद्यपि ।

तथापीदं यथासंस्थं भवत्वन्येन किं मम ।। २४ '

भावाभावेषु यत्तुल्यं तन्नाशे तत्स्थितौ च वा ।

यः प्रयत्नस्त्वबुद्धित्वात्तद्योगगमनं भवेत् ।। २५

तस्मात्प्रयामि पातालं बोधयाम्यसुरेश्वरम् ।

स्थैर्यं यामि न संसारलीलां संपादयाम्यहम् ।। २६

असुरपुरमवाप्य प्रोद्धताचारघोरं

कमलमिव विवस्वान्दैत्यमुद्बोधयामः ।

जगदिदमखिलं स्वस्थैर्यमभ्यानयामो

घनविधिरिव शैले चञ्चलं मेघजालम् ।। २७

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषूपशमप्रकरणे परमेश्वरवितर्को नामाष्टात्रिंशः सर्गः ।। ३८ ।।